श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे

# ॥ वदान्यस्तबकः त्रयोदशः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

# ॥ वदान्यस्तबकः त्रयोदशः ॥

वाराशि दुहितुस्तस्या वरिवस्यां विदध्महे।
अनन्यजनसामान्याम् आहुर्यस्या वदान्यताम्॥ **13.1** ॥

द्वित्वं चेदधिरसनं विलोचनेषु
त्रित्वं वा यदि वदनेषु वा चतुष्ट्वम्।
यद्वा स्यादधिभुजमेतदम्ब वक्तुं
दातृत्वं तव कवयस्तदा क्षमेरन्॥ **13.2** ॥

यः पिबेज्जलधिमम्ब यस्तरेद्
यश्च तत्र नियतं शयीत वा।
तेन वर्णयितुमर्णवात्मजे
शक्यते तव वदान्यता न वा॥ **13.3** ॥

अम्ब त्वमेवाश्रितमृत्युहन्त्री
सनातनी सर्वफलप्रदाऽसि।
स्वयं च पञ्चत्वमुपाश्रितेभ्यो
देवद्रुमेभ्यो लभतां फलं कः॥ **13.4** ॥

तामत्युदारां कमले भजे त्वां
यया सुधाब्धौ सहजन्ममात्रात्।
एकस्तरुर्लुब्धवतंसकोऽन्यः
पशुश्च कश्चित्प्रथितो वदान्यः॥ **13.5** ॥

त्वमम्ब दात्रीति किमत्र चित्रं
त्वद्वासदेशेऽपि न लोभवार्ता।
निदर्शनं तत्र भवन्निवासः
सर्वार्थदायी स वृषाद्रिनाथः॥ **13.6**॥

औदार्यमास्तां नृहरेर्य एष
हिरण्यदानावसरे सरोषः।
सानन्दमिष्टं सकलं ददत्याः
स्तुत्यं वदान्यत्वमिदं भवत्याः॥ **13.7**॥

देहि देवि दयया निरामयाम्
अत्र च श्रियममुत्र च स्वयम्।
सञ्चरेम न यथा मुहुर्वयं
याचका इह पिशाचका इव॥ **13.8**॥

त्वमेव सर्वकाङ्क्षितप्रदा पदाब्जसेविनां
वदान्यतागुणस्तु ते वदान्यतः क्व दृश्यते।
सुधापयोधिकन्यके मुधा समुन्नतिस्पृशा
न दानवारिदारुणोत्तमेन विद्यते फलम्॥ **13.9**॥

श्रीवत्सजुष्टं स्थलमाश्रिता त्वं
मनोहरा क्षीरचिताश्रितश्रीः।
प्रवालदीधित्यवलम्बिताङ्घ्रिः
सत्यं रमे कामधुगस्युदारा॥ **13.10**॥

ख्यातः कलामात्रद एष चन्द्रो
मातः शिबिश्चेत् पलमात्रदायी।
विषप्रदो वारिधरः श्रितानां
कल्याणि काङ्क्षाधिकदा त्वमेव॥ **13.11**॥

कल्पद्रुमः सुमित एव घनोऽप्रदाता
कर्णोऽप्यपार्थकरुणः स बलिः कुदाता।
नाथस्तवापि कमले स हिरण्यहारी
नातोऽस्ति ते वितरणे प्रतिवस्तु किञ्चित्॥ **13.12**॥

आमोदजुष्टं मधुकालयोगात्
फलं ददानं भजतामभीष्टम्।
शाखाशतोदारसुपर्णवाहं
देहं रमे कल्पतरुं तवाहुः॥ **13.13**॥

मुदा वदान्याश्रितमब्धिकन्ये
यं किन्नरेशादधिकं करोषि।
न किं नरेशादधिकः स एष
इतीममाहुर्भुवि हन्त सन्तः॥ **13.14**॥

विविधविभवदात्रीमिन्दिरे विश्वधात्रीं
भगवति पदवीं यः सेवते देवतेड्याम्।
अधिकृतिलवमात्रादन्तरिक्षोन्मुखाक्षान्
अयमगणितसत्त्वानल्पकान्नोपसर्पेत्॥ **13.15**॥

त्वयि भगवति सत्यां सर्वमिष्टं ददत्यां
किमपि नृपपिशाचं याचते यः कुचेताः।
फलवति सहकारे भासुरे सत्यदूरे
श्रयति दुरधिरोहं देवि शाकोटकं सः॥ **13.16**॥

प्रपदनजुषां दृष्टादृष्टार्पणैकवदान्ययोः
तव चरणयोः सेवामेवाचराणि हरेः प्रिये।
सकृदपि पुनस्त्रासी नासीय हन्त विवित्सया
परुषवचसां राज्ञां प्राज्ञावमानकृतां पुरः॥ **13.17**॥

दृष्टादृष्टदयार्द्रया शिशिरया दत्ताखिलार्थास्त्वया
मातर्वातविधूतवारिदचलश्रीलेशलब्धोन्नतेः।
दर्पोद्रेकविनर्तितभ्रु परुषं दन्दह्यमानेक्षणं
दस्योरास्यमुपास्य कस्यचिदमी न स्याम हास्या वयम्॥ **13.18**॥

कातर्येण कदर्यवर्यनृपतिप्रीतिप्रतीक्षोदितः
कष्टं कष्टमपास्तवास्तवचमत्कारो न मे रोचते।
रामे वेङ्कटनेतुरद्भुतगुणग्रामे दयामेदुरां
त्वामेव श्रितकामधेनुमसकृत् सा मे स्तुतां भारती॥ **13.19**॥

भीमानहं न भीमान्
राज्ञां निचयान् श्रयेय घोराज्ञान्।
कल्पानोकहकल्पान्
शौरेः दारान् भजे महोदारान्॥ **13.20**॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे वदान्यस्तबकः त्रयोदशः॥